International Journal of Research in Economics and Social Sciences(IJRESS)
Available online at: http://euroasiapub.org
Vol. 8 Issue 8, August- 2018
ISSN(o): 2249-7382 | Impact Factor: 6.939 |

# पञ्चदशीग्रन्थस्य कल्याणपीयूषव्याख्यायाः वैशिष्ट्यम्

डॉ.भगवानसामन्तरायः

निखिलप्रपञ्चे समेषां शास्त्रकाराणां दार्शनिकानां च मुख्यं लक्ष्यं भवति मोक्षप्राप्तिः । तच्च तत्त्वज्ञानमन्तरा नैव सम्भवति । अत एव तत्त्वज्ञानावाप्त्यर्थं दार्शनिकानां प्रवृत्तिः । दर्शनानि अनेकानि तत्काराश्च अनेके भवन्ति, किन्तु सर्वेषां संसारान्मुक्तिरिति समानावधारणा । आस्तिक-नास्तिकभेदेन दर्शनस्य विभाजनं क्रियते । वेदान्तोऽपि विभिन्नमतावलम्बिनां सिद्धान्तानामाधारेण अद्वैत-विशिष्टाद्वैत-द्वैत-शुद्धाद्वैत-पूर्णाद्वैतभेदेन विभाज्यते । तत्र शङ्करभगवत्पादानां सिद्धान्तेन प्रतिपदितमद्वैतदर्शनं शाङ्करदर्शनं वा इति उच्यते । इदं शाङ्करदर्शनम्, अद्वैतवेदान्तदर्शनं सम्पूर्णतया श्रुतिस्मृतिन्यायपुरस्सरं विकसितं वर्तते ।

शाङ्करवेदान्तपरम्परायामाचार्यविद्यारण्यस्वामिना प्रणीतः पञ्चदशीग्रन्थः अत्यन्तं प्रसिद्धः महत्त्वपूर्णश्च वर्तते । आचार्यविद्यारण्यः पञ्चदशाध्यायोपेते श्लोकात्मके अस्मिन् प्रकरणग्रन्थे अद्वैतवेदान्तस्य सर्वान् सिद्धान्तान् संक्षेपतया प्रतिपादयति । इमं ग्रन्थमाधारीकृत्य अनेके टीकाकाराः बह्वीः टीकाः रचितवन्तः। लिङ्गनसोमयाजी-महाभागेनापि कल्यणपीयूषव्याख्या इति कश्चन व्याख्याग्रन्थः अद्वैतवेदान्तस्य सर्वान् मौलिकसिद्धान्तान् सरलया भषया क्रोडीकृत्य व्यरचि ।

अद्वैतवेदान्तस्य मूलभूतं तत्त्वं वेदेषु अन्तर्निहितमस्ति । 'एकमेवाद्वितीयम्' (छा.उ. ६/२/१) 'एको देवः सर्वभूतेषु गूढः' (श्वे.उ. ६/११) इत्यादिश्रुतयः अद्वैतवादं निरूपयन्ति । अद्वैतपरम्परानुमोदितः शाङ्करसिद्धान्तप्रतिपादकः आचार्यविद्यारण्यप्रणीतः पञ्चदशीग्रन्थः अत्यन्तमहत्त्वपूर्णो वर्तते । चतुर्दशशतकीये विद्यामाना आचार्यविद्यारण्यस्वामिनः श्लोकात्मके पञ्चदशाध्यायोपेतेऽस्मिन् प्रकरणग्रन्थे अद्वैतवेदान्तस्य सर्वान् मौलिकसिद्धान्तान् मौलिकदृष्टान्तप्रदर्शनपुरस्सरं संक्षेपतया सरलतया च प्रतिपादयन्ति । अस्य ग्रन्थस्योपरि नैके टीकाकारः टीकाग्रन्थान् विरचितवन्तः । तेषु टीकाग्रन्थेषु लिङ्गनसोमयाजिरायप्रोलुप्रणीतकल्यणपीयूषव्याख्याग्रन्थः अन्यतमः । अत्र अद्वैतवेदान्तस्य सर्वान्

मौलिकसिद्धान्तान् सरलया भाषाया ते प्रपतिपादयन्ति । अयं टीकाग्रन्तः अद्वैतवेदन्तशास्त्रस्य कृते महदुपकारको भवति । अस्य टीकाग्रन्थस्य अध्ययनेन पञ्चदशीग्रन्थः अनायासेन अवगन्तुं शक्यते इति विश्वसिमः । अस्याः कल्याणपीयूषव्याख्यायाः समीक्षणमपि अवश्यं कर्त्तव्यं वर्तते । कल्याणपीयूषव्याख्योपरि शोधप्रबन्धः सर्वेषां महदुपकाराय भविष्यति । अस्याध्ययनेन अनुशीलनेन च व्याख्याकारस्य शैली विज्ञातुं शक्यते । अग्रे अत्र शोधकार्यं करिष्यमाणानां कृते च सहायको भविष्यतीति ।

दर्शनानि मानवजीवनस्य मूलभूततत्त्वानि वोधयन्तीति प्रतिपादितम् । दर्शनशब्दस्य व्युत्पत्तिः तदेव वर्त्तते, दृश्यते ज्ञायते वा पदार्थः अनेन इति । अर्थात् – दर्शनं वास्तविकं ज्ञानम् । तदपि भारतीयदर्शनम् आस्तिकाख्यं वेदोपबृह्मितत्वात् भारतीयास्तिकदर्शनानि जीवनमूल्यानि निरतिशयसुखप्रदायकानि च भवन्ति । षड् आस्तिकदर्शनेषु वेदान्तदर्शनं परमं तत्त्वावबोधने मोक्षप्राप्तये च परमं साधनम् भवतीति सर्वेषां दार्शनिकानाम् अभिमतम् । वेदान्तेषु अपि अद्वैतवेदान्तदर्शनं ब्रह्मस्वरूपप्रतिपादने जीवजगतोश्च मिथ्यात्वप्रतिपादने विशिष्टं स्थानं भजते । **“जगन्मिथ्या ब्रह्मसत्यम्”** इति प्रतिपादनात् परमलक्ष्यं मोक्षः सिद्धयति इति नास्ति काचित् विप्रतिपत्तिः ।

अद्वैतसम्प्रदाये परम्पराक्रमेण अनेके आचार्याः अभूवन् । तेषु सर्वेषु आचार्येषु पञ्चदशीकारः विद्यारण्यस्वामी अन्यतमो भवति । भारतितीर्थः शङ्करान्दः इति गुरुभिः प्रसादीकृतः शिष्यः पञ्चदशीकारः विद्यारण्यस्वामी अद्वैतजगत् प्रति एकं विशिष्टं फलम् अदात् ! येन पञ्चदशीग्रन्थरूपेण अद्वैताकाशो जाज्वल्यज्योतिरूपेण सर्वदा प्रकाशते । अद्वैतपरम्परामनुसृत्य केचन प्रकरणग्रन्थाः रचिता । तत्र जनान् बोधसरसतया बोधयितुं शङ्कराचार्यप्रभृतिभिः, महद्भिः अद्वैताचार्यैः बहवः प्रकरणग्रन्थाः रचिताः ।

**शास्त्रैकदेशसम्बद्धं शास्त्रकार्यान्तरे स्थितम् ।**
**आहुः प्रकरणं नाम ग्रन्थभेदं विपश्चितैः ।।**

इति लक्षणानुसारं प्रथितेषु अनेकेषु प्रकरणग्रन्थेषु विद्यारण्यस्वामिनः अयं पञ्चदशीग्रन्थः अन्यतमः । अत्र पञ्चदशप्रकरणानि सन्ति । पञ्च विवेकप्रकरणानि, पञ्च दीपप्रकरणानि, पञ्च आनन्दप्रकरणानि च इत्येवं रूपेण विभक्तानि दृश्यन्ते । विद्यारण्यमुनिकृतस्य पञ्चदशीग्रन्थस्य अनेके टीकाकाराः व्याख्याकाराश्च प्रसिद्धाः सन्ति । यथा - आचर्यरामकृष्णस्य तात्पर्यबोधिनीनामकटीका, रामानन्दस्वामिनः विशुद्धदृष्टिटीका, अच्युरामशर्मणः पूर्णानन्देन्दुकौमुदीटीका, निश्चलदासस्य वृत्तिप्रभाकरटीकाः प्रसिद्धाः सन्ति । एवमेव टीकाकारक्रमेण कल्याणपीयूषव्यख्याकारस्य लिङ्गनसोमयाजीमहोदयस्य पञ्चदशीव्यख्यानं प्रसिद्धं वर्तते । पञ्चदशीग्रन्थस्य कल्याणपीयूषव्याख्यायाः कर्त्ता भवति लिङ्गनसोमयाजीमहोदयः आन्ध्रप्रदेशे जनिमलभत । एते आचार्याः श्रुङ्गेरीमठाद्वैतपरम्परायां वेदान्तशास्त्रं सम्यगधीषत । उनविंशशतके पञ्चदशीग्रन्थस्य एका विशिष्टा व्याख्या कल्याणपीयुषनाम्ना प्रसिद्धा वर्तते । यद्यापि स्वकीये कल्याणपीयूषव्यख्यानग्रन्थे कुत्रापि स्वपरिचयः तैः नोल्लिखितः । तथापि सामान्यरीत्या एते दाक्षिणात्यविद्वांसः अद्वैतशङ्करपरम्परायां प्रसिद्धाः सन्ति इति तत्तत् इतिहासग्रन्थेषु ज्ञातुं शक्यते ।

लिङ्गनसोमयाजीमहोदयस्य पञ्चदशीव्याख्यायाः नाम कल्याणपीयूषः इति । अस्यां व्याख्यायां सारल्येन पदव्युत्पत्तिः, पदार्थयोजना च दृश्यते । अस्याः व्याख्यायाः भाषा अतीव सरला सर्वजनबोध्या भवति । व्याख्यानस्य यत् पञ्चलक्षणं वर्तते पदच्छेदः, पदार्थोक्तिः, विग्रहः, वाक्ययोजना इति तत् सर्वं लक्षणं स्वीकृत्य इमे आचार्याः व्याख्यानं कृतवन्तः । व्याख्याकारैः अध्येतृजनसौकर्याय वह्वीः शङ्काः स्वयम् उत्थाप्य विशदीकृताः दृश्यन्ते । भावाश्च क्वचित्स्थलेषु क्रोडीकृताः दृश्यन्ते । यथा – तत्त्वविवेकप्रकरणे संवित्स्वरूपम्, अवस्थात्रयविचारः, सृष्टिस्वरूपं, सृष्टिस्वरूपविचारः समाधिविचारश्च इत्येते विचाराः यथा तैः प्रतिपादिताः, अन्यत्र तथा सारल्येन बोद्धुं न शक्यते । एवमेव महाभूतविवेकप्रकरणे महाभूतानाम् उत्पत्तौ, तेषां सत्यत्वमिथ्यात्वविचारे, अद्वैत ब्रह्मणः तात्पर्यमेव सृष्टिविचारः इति एतेषां विषयाणां सन्निवेशः सम्यक्तया कृतः। पञ्चकोशविवेकप्रकरणे प्रत्येकस्यापि कोशस्य विवेचनपुरस्सरं श्रुतिसूत्राणां तात्पर्यप्रकटनं विपुलतया कृतम् । महावाक्यप्रकरणे च प्रत्येकस्यापि महावाक्यस्य मूलग्रन्थे उदाहृतानां प्रकरणानाम् उपक्रमं सम्यक् विधाय महावाक्यानां विचारः अत्यन्तसुलभतया सरलया बालवोधरूपया च शैल्या प्रतिपादितः ।

संवित् नाम ज्ञानम् । नित्यसत्यरूपा तिसृषु अवस्थासु न भिद्यते । यद्यपि स्वप्न-जागर-सुषुप्तिषु विषयाणां भेदः भवति, किन्तु ज्ञानस्य अभेदः अनुभूयते । अतः तदेव ज्ञानम् आत्मस्वरूपं भवति । आत्मा सच्चिदानन्दस्वरूपः इति प्रतिपादयितुकामः आचर्यः विद्यारण्यस्वामी संविदः स्वप्रकाशत्वं परमानन्दरूपत्वं च प्रतिपादितवान् । तत्र "ईशसृष्टं जीवभोग्यं द्वाभ्यां जगत् प्रपञ्चितम्" इत्येवं प्रकारेण पञ्चदशीकारः सृष्टिस्वरूपं व्यचारयत् । परमात्मनः सकाशात् पञ्चभूतानां सृष्टिरिति महाभूतसृष्टिप्रकरणे प्रत्यपादयत् । तत्र कल्याणपीयूषव्याख्याकर्ता आचार्यः लिङ्गनसोमयाजीमहोदयः विविधौपनिषदां वचनमाधारीकृत्य भूतानां भौतिकानां सृष्टिं प्रत्यपादयत् । किं च अनेन सृष्टिप्रतिपादकवचनेन ब्रह्म स्वगतसजातीय-विजातीयभेदरहितम् इति प्रतिपादिम् । अपि च आकाशादीनि पञ्चभूतानि परमार्थतः ब्रह्मरूपाणि, स्वरूपतः मिथ्याभूतानि इति यथाग्रन्थं प्रपतिपादितः । पञ्चकोशविवेकप्रकरणे जीवः पञ्चकोशोपाधियुक्तः अन्नमय-प्राणमय-विज्ञानमयादिपञ्चकोशः इति विचारः कृतः । तत्र स्थूल-सूक्ष्म-कारणशरीरमाधारीकृत्य जीवस्य कोशोपाधिः परिकल्पितः । विशिष्य विज्ञानमयकोशः कर्त्तारूपः, प्राणमयः क्रियारूपः, मनोमयश्च करणरूप इति प्रतिपादितः । द्वैतविवेकप्रकरणे शास्त्रीयमशास्त्रीयद्वैतमिति द्विधा विभज्य मनोमय-विज्ञानमयः इति भेदं स्वीकृत्य द्वैतप्रपञ्चं निनिन्द । मनोमयः धीमयः च जीवबन्धकृत् भवति । अतः सर्वस्य जीवस्य बन्धकृत् मानसं जगत् । तत्र अनेकैः लौकिकैः उदाहरणैः व्याख्याकारः मनोमयस्य द्वैतजगतः भ्रान्तिमत्वं प्रत्यपादयत् । "विषयौ द्वौ स्तः घटौ मृण्मयधीमयौ" "काचित् मांसमयी योषित् काचित् अन्या मनोमयी" इत्येवं रूपेण उदाहरणं प्रयुक्तम् ।

व्याख्यानावसरे कल्याणपीयूषकारः आचार्यलिङ्गनसोमयाजीमहोदयः बौद्धानां विज्ञानवादम् अत्यन्तविस्तृततया विचारितवान् । महावाक्यप्रकरणे अखण्डार्थबोधकं जीवब्रह्मैक्यम्, अभेदप्रतिपादकानि चत्वारि महावाक्यानि च विचारितानि दृश्यन्ते । तत्र ऋग्वेदस्य प्रज्ञानं ब्रह्म, यजुर्वेदस्य अहं ब्रह्मास्मि, सामवेदस्य तत्त्वमसि, अथर्ववेदस्य अयमात्मा ब्रह्म इति चतुर्णां महवाक्यानां विचारः यथोपनिषदुपक्रमं विधाय सप्रसङ्गं व्याख्यातवान् इति कल्याणपीयूषव्याख्यायाः वैशिष्ट्यं प्रत्यपादयत् आचार्यलिङ्गनसोमयाजीमहोदयः ।

इदं च व्याख्यानं यद्यपि नाधिकं प्राचीनं, किन्तु 1941 तमे एकवारं प्रकाशितमपि न केनापि सम्पादितं प्रकाशितं वेति सन्देहस्यायं विषयः । एतादृशानां प्राचीनग्रन्थानां समीक्षणेन पौनःपून्येन सम्पादनेन किञ्चित् नूतनतथ्यं बहिरागच्छेत् इति धिया अधमेनानेन प्रयासो विहितः । किं च जिज्ञासूनां विदुषां च दृष्टिः पौनःपुन्येन पतति चेत् व्याख्याकर्त्तुः श्रमसाफल्यं भविष्यति इति । समाजस्य च नूतनमेकं दिग्दर्शनप्रदानपुरस्सरं इदानीन्तनच्छात्रान् सम्यक् मार्गयिष्यति इति अस्माकं द्रढीयान् विश्वासः ।

**सन्धर्भग्रन्थसूची :-**

1. पञ्चदशी (रामकृष्णव्याख्योपेता) ।
2. विवेकचुडामणिः ।
3. वेदान्तपरिभाषा ( शिखमणिव्याख्योपेता ) ।
4. वेदान्तसारः (दिद्वन्मनोरञ्जिनीव्याख्योपेतः) ।
5. ईशादिदशोपनिषद् ( शाङ्करभाष्यम्) ।
6. ब्रह्मसूत्रशाङ्करभाष्यम् (न्यायनिर्णय-रत्नप्रभा-भामती-कल्पतरु-परिमलटीकोपेतम्) ।
7. सिद्धान्तविन्दुः, दक्षिणामूर्तिप्रकाशनम् ।

International Journal of Research in Economics and Social Sciences(IJRESS)
Available online at: http://euroasiapub.org
Vol. 8 Issue 8, August- 2018
ISSN(o): 2249-7382 | Impact Factor: 6.939 |

8. सिद्धान्तलेशसङ्ग्रहः, चौखम्बा संस्कृत सीरीज ।
9. श्रीमद्भगवद्गीता (शाङ्करभाष्योपेता), गीताप्रेस ।
10. संक्षेपशारीरकम्, आनन्दाश्रममुद्रणालय ।

विभागाध्यक्षः
अद्वैतवेदान्तविभागः
राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)
वेदव्यासपरिसरः, बलाहारः, हिमाचलप्रदेशः